दिनाङ्कः 17.06.2026 प्रातः - 06:55

## अथ वार्ताः

### प्रधानमंत्री द्वैपाक्षिकोपवेशनं

फ्रांस-देशस्य एवियन्-नगरे जी-7 शिखरसम्मेलनावधौ प्रधानमन्त्रिणा नरेन्द्रमोदिना विभिन्नानां राष्ट्राणां नेतृभिः सह द्वैपाक्षिकोपवेशनं कृत्वा विस्तृतं कूटनीतिक-कार्यं विहितम्। विदेशमन्त्रालयानुसारम्, प्रधानमन्त्रिणा मोदिना तथा तस्य कनाडा-देशस्य समकक्षीयेन मार्क् कार्नी इत्यनेन च भारत-कनाडा-देशयोः सम्बन्धेषु सकारात्मकतायाः स्वागतं कृतम्। ब्रिटिश्-प्रधानमन्त्री कीर स्टार्मर इत्यनेन सह मिलित्वा, प्रधानमन्त्री मोदी पञ्चत्रिंशोत्तर द्विसहस्रतम वर्षस्य दूरदृष्ट्यान्तर्गतं भारत-यू. के. सम्बन्धानां प्रगतिं समीक्षितवान्। प्रधानमन्त्री मोदी जी7 शिखरसम्मेलनावधौ यु. ए. ई. अध्यक्षेण शेख् मोहम्मद् बिन् जायद् अल् नह्यान् इत्यनेन सहापि मिलितवान् तथा च पश्चिम-एशिया-क्षेत्रे चिरस्थायी शान्तिं, सुरक्षां, स्थिरतां च प्रवर्धयितुं संवादस्य, कूटनीतेः, अन्ताराष्ट्रियविधेः, सार्वभौमत्वस्य, प्रादेशिक-अखण्डतायाश्च सम्मानस्य महत्त्वं अधोरेखितवान्। केन्यादेशस्य राष्ट्रपतिना विलियम् रूटो इत्यनेन सहापि श्रीमोदी मेलनं कृतवान्। श्रीमोदी अवदत् यत् भारतं केन्या च वैश्विक-दक्षिणस्य आकांक्षासु दीर्घकालं यावत् सहभागित्वं कुर्वन्ति। जपान-देशस्य प्रधानमन्त्रिणा सह मिलित्वा श्रीमोदी अवधानं दत्तवान् यत् भारत-जपान्-देशयोः सम्बन्धः विविधेषु क्षेत्रेषु निरन्तरं सुदृढं भविष्यति।

### प्रधानमंत्री-ट्रम्प-द्वैपाक्षिकसम्मेलनम्

फ़्रान्स-देशस्य एवियन-नगरं अद्य वैश्विक-कूटनीतेः केन्द्रः अस्ति यतः जी7 शिखरसम्मेलनस्य महत्त्वपूर्णे चरणे अस्ति। भारतस्य सहभागि-देशस्य रूपेण सहभागित्वेन, सर्वेषाम् दृष्टिः प्रधानमन्त्रिणा नरेन्द्रमोदिना अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह बहुप्रतिक्षितायां द्वैपाक्षिकसम्मेलने दृढतया निबद्धः अस्ति, यत् अद्य शिखरसम्मेलनावधौ भविष्यति। पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य फरवरी-मासे वाशिङ्गटन-डी. सी. इत्यत्र अन्तिमवारं मेलनानन्तरं उभयोः मध्ये एतत् प्रथमं मेलनं भविष्यति। अद्यतनस्य संवादस्य समये, तौ बहुविधक्षेत्रेषु द्वैपाक्षिकसहयोगं सुदृढं कर्तुं चर्चां करिष्यतः, तथा च परस्परहितानां क्षेत्रीय-वैश्विक-विषयेषु चर्चां करिष्यतः इत्यपेक्षा अस्ति। अमेरिकादेशस्य राष्ट्रपतिना सह मेलनम् अतिरिच्य, अद्य प्रधानमन्त्री श्रीमोदी "सर्वेभ्यः लाभाय सन्तुलितं, सर्वसमावेशं, सुस्थिरं च आर्थिकवृद्धेः पुनरुत्थानं" इत्यस्मिन् विषये, तथा " कृत्रिम बुद्धिमत्तायाः सुरक्षितं, द्रुत-प्रभावी-उपयोगं सुनिश्चेतुम् " इति विषये जी7 इत्यस्य कार्य-सत्रे अपि भागं ग्रहीष्यति। प्रधानमन्त्री ईयु-परिषदः अध्यक्षेण एन्टोनियो कोस्टा इत्यनेन सह, ईयु-आयोगस्य अध्यक्षया फॉन डेर लेयेन् इत्यनया सह त्रिपक्षीयसम्मेलनं करिष्यति, जर्मन्-चान्सलर् फ्रेडरिक् मर्ज् इत्यनेन सहापि द्वैपाक्षिकोपवेशनं करिष्यति।

### प्रधानमन्त्री- सत्र संबोधन

प्रधानमन्त्री नरेन्द्रमोदी ह्यः फ्रान्स् देशस्य एवियन्-नगरे जी7 शिखरसम्मेलने "नूतनसहभागित्वस्य निर्माणम् तथा अन्ताराष्ट्रिय-ऐक्यभावस्य पुनर्निर्माणम्" इत्यस्मिन् विषये सत्रम् अभिसंबोधितवान्। विदेशमन्त्रालयेन सूचितं यत्

सत्रावधौ प्रधानमन्त्रिणा अन्ताराष्ट्रिय-सहभागित्व-निर्माणे विशेषतः वर्धमान-परस्पर-सम्बद्ध-विश्वे 'विश्वासस्य' महत्त्वम् अधोरेखितम्। सभायां, प्रधानमन्त्रिणा अधोरेखितम् यत् भारतं सर्वदा मानवतायै प्रथमम् इति दृष्टिकोणम् अनुसरति। सः अग्रे अकथयत् यत् भारतस्य अन्ताराष्ट्रियसहभागित्वस्य दूरदृष्टिः 'वसुधैवकुटुम्बकम्' इत्यस्य कालातीतदर्शनस्य आधारेण अस्ति-विश्वं एकः परिवारः अस्तीति।

**<u>फ़ीफ़ा</u>**

फ़ुट्बाल-क्रीडायां, गतरात्रौ न्यू-जर्सी-क्रीडाङ्गणे षड्विंशत्यधिक द्विसहस्रतम वर्षस्य फ़ीफ़ा-विश्वचषकेत्यस्य प्रथम-समूहस्य आरम्भिक-क्रीडायां फ़्रान्स्-देशेन सेनेगल-देशं त्रीणि एकं इति अङ्कैः पराजितम्।

।।इति वार्ता:।।